दिनाङ्क :-22.03.2025

प्रात: - 06:55

**अथ वार्ताः**

**राष्ट्रपति**

**राष्ट्रपतिपदासीनया द्रौपदी मुर्मू वर्यया एम्स-संकायं प्रति आग्रहः कृतः यत् तेन मानसिक-स्वास्थ्य-विषये जागरूकता-अभियानं आरम्भम् करणीयं येन जनाः अस्य रोगस्य विषये जागरूकाः भवेयुः। गतसायं नवदिल्ल्यां अखिलभारतीयचिकित्साविज्ञानसंस्थानस्य ऊनपञ्चाशत्तमे दीक्षांतसमारोहे सम्बोधयन्त्या मुर्मु वर्यया प्रोक्तं यत् अद्य जगति भावनात्मकस्वास्थ्यविषयाः गभीराणि समाह्वानानि जनयन्ति। अन्यस्मिन् कार्यक्रमे राष्ट्रपति: मुर्मु: प्रोक्तवती यत् वंचितवर्गं प्रति संवेदनशीलता कस्यापि देशस्य समाजस्य वा प्रतिष्ठां निर्धारयति। गतसायं राष्ट्रपतिभवने पर्पल फेस्ट इत्यस्य आयोजनं सम्बोधयन्त्या राष्ट्रपतिः अवदत् यत्, करुणा, समावेशिता, सामञ्जस्यं च भारतीयसंस्कृतेः सभ्यतायाः च मूल्यानि अभवन्। पर्पल-उत्सवस्य' उद्देश्यं दिव्यांगतायाः विषये जागरूकतां जनयितुं, जनानां जीवने तेषां प्रभावस्य च विषये अस्ति तथा च समाजे दिव्याङ्गानाम् अवगमनं, स्वीकारं, समावेशं, प्रवर्धनं च अस्ति।**

**राज्यसभा-गृहमंत्रालय**

**गृहमन्त्री अमितशाहः उक्तवान्, नरेन्द्रमोदी प्रशासनेन विगतेषु दशवर्षेषु राजनैतिकइच्छाशक्त्या:, प्रौद्योगिक्याः च उपयोगेन राष्ट्रस्य सुरक्षा सुदृढा जाता। ह्यः राज्यसभायां गृहमन्त्रालयस्य कार्याणां विषये चर्चायाः उत्तरं ददता मन्त्रिणा एनडीए-सर्वकारस्य आतङ्कवादं प्रति शून्यसहिष्णुतानीतिः इति प्रकाशिता।**

**सः प्रतिपादितवान् यत् जम्मू-कश्मीरे आतङ्कवादः, वामपक्षीय-उग्रवादः, पूर्वोत्तरे उग्रवादः च पूर्वं देशस्य त्रीणि प्रमुखाणि समाव्हानानि आसन् येन तस्य प्रगतिः विकासः च बाधिता आसीत्। गृहमन्त्रिणा उक्तं यत् आगामिवर्षस्य मार्चमासं यावत् भारतात् नक्सलवादस्य उन्मूलनं भविष्यतीति।**

**<u>राज्यसभा-कृषि</u>**

**केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह चौहानः उक्तवान् यत् डिजिटल कृषि अभियानस्य अन्तर्गतं देशस्य प्रत्येकस्य कृषकस्य डिजिटल परिचयपत्रं प्रदत्तं भविष्यति। पञ्चविंशत्यधिक द्विसहस्र, षड्विंशत्यधिक द्विसहस्र तम वर्षयोः स्व-मन्त्रालय-सम्बद्धानुदान-याचिकासु विषये लोकसभायां चर्चायाः उत्तरं ददता श्रीचौहानेन उक्तं यत्, अस्योपक्रमस्य माध्यमेन कृषकाः विविध-सर्वकारीय-योजनानां लाभं प्राप्तुं शक्नुवन्ति।**

**<u>विदेशमंत्रालय</u>:**

**यूक्रेन-रूस-सङ्घर्षयोः भारतस्य स्थितिः सुप्रसिद्धा, स्पष्टा चेति सर्वकारेण उक्तम्। तत्र उक्तं यत्, भारतं सर्वदा द्वन्द्वस्य स्थायिनिराकरणाय द्वयोः पक्षयोः अन्येषां च प्रमुखहितधारकाणां मध्ये संवादस्य कूटनीतेः च माध्यमेन व्यावहारिक संलग्नतायाः पक्षे आसीत्। गतसायं नवदिल्ल्यां वार्ताहरैः सह चर्चायां विदेश मंत्रालयस्य प्रवक्ता रणधीरजयसवालः अवदत् यत्, भारतं द्वन्द्वस्य उभौ पक्षौ समेत्य अन्यैः हितधारकैः सह वार्तालापः अस्य बृहत्तरस्य दृष्टिकोणस्य अनुरूपः एव आसीत्।**

**<u>लण्डन-हीथ्रो</u>**

**लण्डन-नगरे हीथ्रो-विमानस्थानकं विद्युत्-उपकेन्द्रे जातस्य भीषणाग्नेः कारणात् चतुर्विंशति-होरायाः अनन्तरं पुनः समारब्धम्। भीषणाग्नेः कारणात् विद्युदापूर्तिः बाधिता आसीत् येन षोडश-सहस्राधिक-गृहाणि विद्युत्-रहितानि जातानि। इदं हीथ्रो-विमानस्थानकं विश्वस्य व्यस्ततमेषु विमानस्थानकेषु अन्यतमम् अस्ति।**

**आईपीएल**

**पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य आईपीएल इति इण्डियन प्रीमियरलीग क्रिकेटस्पर्धा मालिकायाः अष्टादश तमस्य संस्करणस्य आरम्भः अद्य भविष्यति। स्पर्धायाः औद्घाटनिक द्वन्द्वे अद्य सायं कोलकातानगरस्य प्रतिष्ठिते एडेन् गार्डन्स्-क्रीडाङ्गणे गतविजेता कोलकाता-नाइट्-राइडर्स्-दलं रॉयल-चैलेन्जर्स्-बेङ्गलूरु-दलं सम्मुखी करिष्यति। भारतीयमानकसमयानुसारी स्पर्धायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति। बहुप्रतीक्षितस्य संघर्षात् पूर्वं सायंकाले एकस्य उद्घाटनसमारोहस्य अपि आयोजनं भविष्यति। उद्घाटनसमारोहे अभिनेत्री दिशा पटानी, प्रसिद्धा गायिका श्रेया घोषालः, करण औजला च मञ्चे प्रदर्शनं करिष्यन्ति। चतुःसप्ततिः द्वन्द्वेषु दश दलानि स्पर्धां करिष्यन्ति, स्पर्धायाः समापनं मई मासस्य पञ्चविंशे दिनाङ्के भविष्यति।**

**।। इति वार्ताः ।।**